# नवग्रह स्तोत्रम्   navagraha stotram

## आदित्याय षोमाय च मन्गलाय बुधाय च,

ādityāya **ṣ**omāya ca
mangalāya bu**dh**āya ca

## गुरु शुक्र शनिभ्याश्च, राहवे केतवे नमः

guru śukra śani**bh**yāśca,
rāhave    ketave namaḥ

## जपाकुसुमसम्काशम्काश्यपेयम्महाद्युतिम्

japākusumasamkāśam
kāśyapeyam mahādyutim

## तमो’रिम्सर्वपापघ्नं प्रणतो’स्मि दिवाकरम्

tamo’rim sarvapāpa**gh**naṁ
pra**ṇ**ato’smi divākaram

## दधि शन्ख तु.आराभम्क्सीरोदार्नव सम्भवम्,

da**dhi** śan**kha** tu śārā**bha**m
k**s**īrodārnava sam**bha**vam,

## नमामि शशिनम्सोमम्शम्भोर्मुकुत भूसनम्

namāmi śaśinam somam
śam**bho**r mukuta **bhū**sanam

## धरनी गर्भ सम्भूतम्विद्युत्कान्ति सम प्रभम्,

**dha**ranī gar**bha** sam**bhū**tam
vidyut kānti sama pra**bha**m,

## कुमारम्शक्ति हस्तम्तम् मन्गलम्प्रनमाम्यहम्.

kumāram śakti hastam tam
mangalam pranamāmyaham.

**प्रियङ्गु कलिका श्यामं रूपेणा प्रतिमं बुधम्,**

priyaṅgu kalikā śyāmaṁ
rūpeṇā pratimaṁ bu**dha**m,

**सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्**

saumyaṁ saumya-guṇopetaṁ
taṁ bu**dha**ṁ pra**ṇ**amāmyaham

**देवाणां च ऋषीणां च गुरुं काञ्चन संनिभम्,**

devā**ṇ**āṁ ca **ṛṣ**ī**ṇ**āṁ ca
guruṁ kāñcana saṁni**bha**m,

**बुद्धि भूतं त्रिलोकेषं तं नमामि बृहस्पतिम्.**

bud**dhi bhū**taṁ trilokeṣaṁ
taṁ namāmi b**ṛ**haspatim.

**हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम्,**

himakunda m**ṛṇ**ālā**bha**ṁ
daityānāṁ paramaṁ gurum,

**सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम्**

sarva śāstra pravaktāraṁ
**bhā**rgavaṁ pra**ṇ**amāmyaham

**नीलाञ्जन समाभासं रवि पुत्रं यमाग्रजम्,**

nīlāñjana samā**bhā**saṁ
ravi putraṁ yamāgrajam,

**छाया मार्तण्ड संभूतं तं नमामि शनैश्चरं.**

**chā**yā mārta**ṇḍ**a saṁ**bhū**taṁ
taṁ namāmi śanaiścaraṁ.

**अर्धकायं महावीर्यं चन्द्र अदित्य विमर्दनम्,**

ar**dha**kāyaṁ mahāvīryaṁ
candra aditya vimardanam,

**सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम्.**

siṁhikā gar**bha** saṁ**bhū**taṁ
taṁ rāhuṁ pra**ṇ**amāmyaham.

**पलाश पुष्प संकाशं तारका ग्रह मस्तकम्,**

palāśa puṣpa saṁkāśaṁ
tārakā graha mastakam,

**रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्य्**

raudraṁ raudrātmakaṁ **gho**raṁ
taṁ ketuṁ praṇamāmyaham.

**इति व्यास मुखोद्गीतं यः पठेत्सुसमाहितः,**

iti vyāsa mu**khodgītaṁ
yaḥ paṭ**he**t susamāhitaḥ,

**दिवा वा यदि वा रात्रौ विघ्न शान्तिर्भविष्यति.**

divā vā yadi vā rātrau
vi**gh**na śāntir **bha**viṣyati.

**नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम्,**

naranārīnṛpāṇāṁ ca
**bha**ved-duḥ-svapnnāśanam,

**आइश्वर्यमतुलं तेषाम् आरोग्यं पुष्टिवर्धनम्**

āiśvarya matulaṁ teṣām
ārogyaṁ puṣṭivar**dha**nam

**ग्रह नक्षत्रजाः पीडास् तस्कराग्नि समुद्भवाः,**

graha nakṣatra-jāḥ pīḍās
taskarāgni samud**bha**vāḥ,

**ताः सर्वः प्रशमं यान्ति व्यासो ब्रुते न संशयः.**

tāḥ sarvaḥ praśamaṁ yānti
vyāso brute na saṁśayaḥ.

**॥ ईति श्री व्यास विरचितं नवग्रह स्तोत्रं संपूर्णम्. ॥**

Iti śrī vyāsa viracitaṁ navagraha stotraṁ saṁpūrṇam.